श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमन्निगमान्तमहादेशिकैः अनुगृहीतम्

# ॥ श्री कामासिकाष्टकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री कामासिकाष्टकम् ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

श्रुतीनामुत्तरं भागं वेगवत्याश्च दक्षिणम्।
कामादधिवसन् जीयात् कश्चिदद्भुतकेसरी ॥ 1 ॥

तपनेन्द्वग्निनयनः तापानपचिनोतु नः।
तापनीयरहस्यानां सारः कामासिकाहरिः ॥ 2 ॥

आकण्ठमादिपुरुषं कण्ठीरवमुपरि कुण्ठितारातिम्।
वेगोपकण्ठसङ्गात् विमुक्तवैकुण्ठबहुमतिमुपासे ॥ 3 ॥

बन्धुमखिलस्य जन्तोः बन्धुरपर्यङ्कबन्धरमणीयम्।
विषमविलोचनमीडे वेगवतीपुळिनकेळिनरसिंहम् ॥ 4 ॥

स्वस्थानेषु मरुद्गणान् नियमयन् स्वाधीनसर्वेन्द्रियः
पर्यङ्कस्थिरधारणाप्रकटितप्रत्यङ्मुखावस्थितिः।
प्रायेण प्रणिपेदुषां प्रभुरसौ योगं निजं शिक्षयन्
कामानातनुतादशेषजगतां कामासिकाकेसरी ॥ 5 ॥

विकस्वरनखस्वरुक्षतहिरण्यवक्षःस्थली -
निरर्गळविनिर्गळद्रुधिरसिन्धुसन्ध्यायिताः।
अवन्तु मदनासिकामनुजपञ्चवक्त्रस्य माम्
अहम्प्रथमिकामिथःप्रकटिताहवा बाहवः ॥ 6 ॥

सटापटलभीषणे सरभसाट्टहासोद्भटे
    स्फुरत्क्रुधि परिस्फुटद्भ्रुकुटिकेऽपि वक्त्रे कृते।
कृपा कपटकेसरिन् दनुजडिम्भदत्तस्तना
    सरोजसदृशा दृशा व्यतिभिषज्य ते व्यज्यते॥ 7॥

त्वयि रक्षति रक्षकैः किमन्यैः
    त्वयि चारक्षति रक्षकैः किमन्यैः।
इति निश्चितधीः श्रयामि नित्यं
    नृहरे वेगवतीतटाश्रयं त्वाम्॥ 8॥

इत्थं स्तुतः सकृदिहाष्टभिरेष पद्यैः
    श्रीवेङ्कटेशरचितैस्त्रिदशेन्द्रवन्द्यः।
दुर्दान्तघोरदुरितद्विरदेन्द्रभेदी
    कामासिकानरहरिर्वितनोतु कामान्॥ 9॥

॥ इति श्री कामासिकाष्टकं समाप्तम्॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥